National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 192-195
© 2026 NJHSR
www.sanskritarticle.com

मुकेशकुमारमिश्रः
शोधच्छात्रः, साहित्यविभागः,
श्रीलालबहादुरशास्त्रिराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नव देहली

Correspondence:
मुकेशकुमारमिश्रः
शोधच्छात्रः, साहित्यविभागः,
श्रीलालबहादुरशास्त्रिराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नव देहली

श्रीरामभद्राचार्यविरचितं गीतरामायणमहाकाव्यम् – एकः परिचयः (भाग - ख)

मुकेशकुमारमिश्रः

'श्रीरामभद्राचार्यविरचितं गीतरामायणमहाकाव्यम् - एकः परिचयः (भाग - क)' इति पूर्वस्मिन् लेखे मया महाकाव्यस्यास्य स्वरूपं, कथावस्तु, वर्णनविन्यासो, नायक इत्यादयो विषयाः विश्लेषिताः। अवशिष्टः परिचयोऽत्र प्रस्तूयते। तद्यथा -

काव्य-रसः

गीतरामायणमहाकाव्यं काव्यात्मकरसैः परिपूर्णो ग्रन्थो वर्तते। यतो हि जगद्गुरुस्वामि-श्रीरामभद्राचार्यमहाराजाः विशिष्टाद्वैतपरम्परायाः आचार्यास्सन्ति तथा मर्यादापुरुषोत्तमस्य भगवतः श्रीरामचन्द्रस्य बालरूपस्योपासकाश्च। अतो रामभद्रस्यैव लोककल्याणकारिलीलानां गानं कुर्वन्तः भक्तिरसान्विताः भूत्वा ते महाकाव्यमिदं प्रणीतवन्तः। महाकाव्यमिदम् प्रत्यक्षतया परोक्षतया वा आद्यन्तं भक्तिरससिक्तमेवास्ति। भक्तिरस एव महाकाव्यस्यास्य प्रधानो मुख्यो वा रसो वर्तते।

यद्यपि काव्यप्रकाशकारो मम्मटाचार्यः काव्यप्रकाशस्य चतुर्थोल्लासे – **"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः। वीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः॥"**[१] तथा च **"निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः॥"**[२] इति कथयन् शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-वीभत्स-अद्भुत इत्येतानष्टौ रसान् नाट्यशास्त्रे, शान्तं च मिलित्वा नव रसान् काव्ये निर्धारितवान्। एवमेव साहित्यदर्पणकारो विश्वनाथकविराजोऽपि साहित्यदर्पणस्य तृतीयपरिच्छेदे रसनिरूपणप्रसङ्गे - **"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः। वीभत्सोद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः॥"**[३] इति कारिकया पूर्वोक्तं सिद्धान्तमेव प्रतिपादितवान्। परन्तु आचार्यश्रीरूपगोस्वामी 'भक्तिरसामृतसिन्धुः' तथा 'उज्ज्वलनीलमणिदर्पण' इत्याख्यग्रन्थयोः 'भक्ति-रस' इतिनाम्ना एकं स्वतन्त्ररसमुल्लिखितवान्। केचिदाचार्याः मन्वते यत् भक्तिरसस्य स्थापना साहित्यिकक्षेत्रापेक्षया धार्मिकक्षेत्रेषु अधिकाभवत्। साहित्यशास्त्रे 'भक्तिः' देवादिविषयकरतिरूपेण भावानामन्तर्गतं परिगणनीया, न तु रसत्वेन स्वीकरणीया। आचार्यरूपगोस्वामी स्वग्रन्थेषु विस्तरेण भक्तिरसं भिन्नरसरूपेण स्थापितवान्। साहित्यशास्त्रिणामिव स देवादिविषयकरतिम् भावमेव मन्यते। परन्तु तेन भक्तिरसस्य स्थायिभावत्वेन केवलं श्रीकृष्णविषयकरतिरेव निर्धारिता। तन्मते श्रीकृष्णः देवतैव नास्ति अपितु साक्षात् भगवानेव। अतः तद्विषयिका रतिः देवविषयकरतेः सर्वथा भिन्ना वर्तते। अतो भक्तिरसो नैव भावस्यान्तर्गतोऽपितु स्वतन्त्रो रस एव।[४]

जगद्गुरुस्वामिश्रीरामभद्राचार्यविरचितं गीतरामायणमहाकाव्यमधीत्य तथ्यमिदमनुभूयते यत् तेऽपि भक्तिरसमेकं स्वतन्त्ररसं मनुते। इदन्तु निश्चितमेव यदत्र तेषां भक्तिः साकेतविहारिश्रीरामे एकनिष्ठभावेन युक्ता वर्तते। वैष्णवपरम्परायाः सन्तत्वात् तथा च विशिष्टाद्वैतसिद्धान्तस्य सुप्रतिष्ठिताचार्यत्वात् तेऽपि आचार्यश्रीरूपगोस्वामिवत् 'भक्तिम्' एकं स्वतन्त्ररसं मन्यन्ते।

गीतरामायणमहाकाव्ये तैः साकेतविहारिश्रीरामस्य लोककल्याण-कारिकार्याणां विविधलीलानाञ्च यद्गानं कृतं तत्तेषामेव सिद्धान्तं पुष्णाति। उदाहरणार्थं, गीतरामायणमहाकाव्यस्य मङ्गलाचरणमेव महाकवेः सिद्धान्तं सङ्केतयति —

"श्रीसीताहृत्सरोजे कृतनिजनिलयो नीलरत्नावदातो
रातः श्रीप्रेमराया रघुकुलमहिषीमान्यया मञ्जुगुञ्जः।
ऐश्वर्याद्यैः षडङ्घ्रिर्भजनजनिरसं रातु रामानुगेभ्यो
भौमीभव्यास्यकञ्जासवमभिरसयन् रामराजालिराजः॥"[५]

तदनन्तरं गीतरामायणस्य बालकाण्डप्रथमसर्गस्य चतुर्थगीते रचनाकारेण भगवतः श्रीरामस्य दशावताराणां स्तुतिः कृता। तत्रापि भक्तिरस एव प्राधान्येन प्रतीयते—

"अखिलयजलधिधृता भवता महि नौका।
श्रितमनुवेदमयेन जनौका।
राघव धृतमत्स्यशरीर जय श्रीराम हरे॥ १॥
कुधरमवन् भगवन् स्वकरे धृतमन्दर।
भववारिधिमन्दर गुणमन्दिर।
राघव धृतकमठशरीर जय श्रीराम हरे॥ २॥
कनकनयनमवता भवतावनिरूढा।
निशिनलिने स्वलिनीव निगूढा।
राघव धृतसौकररूप जय श्रीराम हरे॥ ३॥
शितनखकनककशिपुतनुवीरणदारण।
जनप्रहलादविपत्तिविदारण।
राघव धृतनृहरिशरीर जय श्रीराम हरे॥ ४॥
भिक्षयसे बलिमवनिमह वटुविग्रह।
पदनखजनितगङ्गखलनिग्रह।
राघव धृतवामनरूप जय श्रीराम हरे॥ ५॥
द्विजकुलशस्यपयोदपरश्वधधारण।
हैहयपतिगजपतिमदवारण।
राघव धृतभृगुवररूप जय श्रीराम हरे॥ ६॥
दशरथकौसल्यासुकृताब्धिसुधाकर।
रामचन्द्ररणहतदशकन्धर।
राघव प्रकटितनृपरूप जय श्रीराम हरे॥ ७॥
कंसवंशवनदहन सुजनसुखशालिन्।
राधावर गिरिधर वनमालिन्।
राघव धृतकृष्णशरीर जय श्रीराम हरे॥ ८॥
करुणयसेऽकरुणेषु विधूतविरोधः।
समदर्शी हृदि संश्रितबोधः।
राघव धृतबुद्धशरीर जय श्रीराम हरे॥ ९॥
म्लेच्छेभ्योऽपि विधित्सुः पदनिर्वाणम्।
कलयसि सहकृपोऽपि कृपाणम्।
राघव धृतकल्किशरीर जय श्रीराम हरे॥ १०॥
गिरिधरकविकृतगीतं परममुदारम्।
शृणु हर मे भवशोकमपारम्।
राघव धृतदशविधरूप जय श्रीराम हरे॥ ११॥"[६]

गीतरामायणमहाकाव्यस्य उत्तरकाण्डस्य चरमपद्यमपि जगद्गुरूणां श्रीरामं प्रति भक्तिभावं प्रमाणीकुर्वत् भक्तिरसस्य स्वतन्त्रसत्तां सिद्ध्यति। तद्यथा -

"श्रीसीतारामपादाम्बुजरसरसिके नाप्तबोधेन दिव्यं
नव्यं गीतैः परीतं वसुखखहरिभिः प्रेमभक्त्येकसारम्।
गीतं श्रीदेववाण्यां गिरिधरकविना गीतरामायणं तत्
नित्यं श्रीरामभक्तिं दिशतु सुकृतिनां गीतसीताभिरामम्॥"[७]

केचन काव्यशास्त्रिणः आचार्याः भक्तिरसं व्यतिरिच्य वात्सल्याख्यमपि रसं स्वतन्त्ररसमिति मन्यन्ते। ईदृशेष्वाचार्येषु साहित्यदर्पणकारो विश्वनाथकविराजः प्रमुखो वर्तते। तेन नाट्यशास्त्रकारं भरतमुनिमुल्लिखन् वात्सल्यरसस्य स्वतन्त्ररसत्वेन स्वीकरणाय सिद्धान्तः प्रतिपादितः।

अथ मुनीन्द्रसम्मतो वत्सलः —

"स्फुटं चमत्कारितया वत्सलं च रसं विदुः।
स्थायी वत्सलता स्नेहः पुत्राद्यालम्बनं मतम्॥
उद्दीपनानि तच्चेष्टा विद्याशौर्यदयादयः।
आलिङ्गनाङ्गसंस्पर्शशिरश्चुम्बनमीक्षणम्॥
पुलकानन्दबाष्पाद्या अनुभावाः प्रकीर्तिताः।
सञ्चारिणोऽनिष्टशङ्काहर्षगर्वादयो मताः॥
पद्मगर्भच्छविर्वर्णो दैवतं लोकमातरः।"[८]

महाकविश्रीरामभद्राचार्यवर्यैः गीतरामायणमहाकाव्ये यथायोग्य-वर्णनानुसारं संस्कृतगीतशैल्यां सर्वेषामपि रसानां समुचितसन्निवेशः कृतः।

<u>काव्यगुणाः रीतयश्च</u>

काव्यस्य आवश्यकतत्त्वत्वेन गुणाः रीतयश्च स्वीक्रियन्ते। आचार्यविश्वनाथकविराजः **"उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः"**[९] इति कथयन् गुणालङ्काररीतीनां काव्योत्कर्षहेतुत्वं प्रतिपादितवान्। काव्यशास्त्रिभिः आचार्यैः माधुर्यम्-ओजः-प्रसादश्चेत्यादयः काव्यगुणाः तथा वैदर्भी-गौडी-पाञ्चाली चेत्यादयः काव्यरीतयश्च मन्यन्ते। श्रीरामभद्राचार्यवर्याः स्वकीये गीतरामायणमहाकाव्ये काव्योत्कर्ष-विधायकानामेतेषां गुणानां रीतीनाञ्च वर्ण्यविषयानुसारं सुसंयोजनं कुर्वन्तः पदावलीः निरमिमीत। भगवच्छ्रीरामचन्द्रस्य लीलासु, तेषां भावपूर्णस्तुतीनां प्रजाहितकारिकार्याणाञ्च वर्णनोपयुक्तगीतेषु माधुर्यप्रसादगुणयोस्तथा च वैदर्भीपाञ्चालीरीत्योः सुसंयोजनं दृश्यते।

युद्धप्रभृतीनां वर्णने ओजोगुणस्य गौडीरीतेश्च समुचितप्रयोगोऽपि वर्तते।

अत्र ध्यातव्यं यत् महाकाव्यस्यास्य भाषाशैलीं सरलां सहजां रसात्मिकाञ्च कर्तुमेव जगद्गुरुभिः विशेषः प्रयासः कृतः। अत एव गीतरामायणमहाकाव्ये युद्धवर्णनप्रसङ्गेऽपि तैः यथासम्भवं दीर्घसामासिकपदानां विकटाक्षरबन्धयुक्तानां पदानाञ्च सन्निवेशः परिहृतः। अतः सहृदयाः सहजरूपेणैव काव्यात्मकरसास्वादनं कुर्वन्तः भक्तिरसपानं कर्तुं शक्नुयुः। तथा च काव्यार्थमवगन्तुं पाठकाय 'द्राविडप्राणायाम' इव कठिनप्रयासो न कर्तव्यः स्यात् प्रयासेऽस्मिन् महाकविः पूर्णरूपेण सफलो जातः। वस्तुतो गीतरामायणमहा-काव्यस्य गीतादीनामध्ययनं श्रवणं वा कुर्वन्तः एव सहृदयपाठका अपूर्वेणानन्देन परिपूर्णा भवन्ति। पाठकस्य श्रोतुश्च मनोमस्तिष्कम् मनोहरपदावलीनां सङ्गीतात्मकतया अपूर्वेणानन्देन युज्यते। बालकाण्डस्य पञ्चमसर्गस्य पञ्चत्रिंशत्तमे गीते महाकविना तीनतालच्छन्दसि भगवतीसीतादेव्याः सौन्दर्यं वर्णितम्। यत्र माधुर्यगुणस्य वैदर्भीरीतेश्च सुप्रयोगः सहजमेव श्रोतॄन् पाठकांश्च भावान्वितं करोति —

"विलसति जनककिशोरी सीता पुलकिततनुः स्वभावविनीता॥ १॥
विन्ध्यमिवानघरघुपतिभावं सा जुगोप किल कोकिलरावम्॥ २॥
हृदयावनिपालितसुरवल्ली अनुदितमण्डितमञ्जुलमल्ली॥ ३॥
सा निनाय शरदं सुकिशोरी गिरिधरप्रभुमुखचन्द्रचकोरी॥ ४॥"[१०]

छन्दोऽलङ्कारयोजना

पाणिनीयशिक्षायां "**छन्दः पादौ तु वेदस्य**"[११] इत्यनेन वाक्येन छन्दसां वेदपुरुषस्य चरणत्वं प्रतिपादितम्। शरीरे यथा चरणानां महत्त्वं वर्तते तथैव काव्यरचनायां छन्दसाम्। यथा चरणाभावे प्राणी समुचितरूपेण गमनागमने असमर्थो भवति तथैव छन्दसामभावे पद्यरचनाकार्यं नैव कर्तुं शक्यते, न च तस्मिन् गेयता भवितुं प्रभवति। अद्यापि छन्दोबद्धरचनायाः यन्महत्त्वं वर्तते छन्दोहीनगद्यात्मकरचना-यास्तन्नैव। वैदिककालादेव छन्दसां वैशिष्ट्यं विद्यते। लौकिक-संस्कृतसाहित्येऽपि रचनाकारैः छन्दोबद्धरचनायामेव विशेषोत्साहः प्रदर्शितः। अधुना काव्यरचनाकाराः लौकिकगीतान्यप्यनुकृत्य काव्यग्रन्थान् विरचयन्ति। महाकविश्रीरामभद्राचार्यवर्याः तामेव परम्परां पुष्टीकुर्वन्तः लोकभाषासु तथा च विभिन्नप्रान्तीयभाषासु प्रचलितानि गीतान्यनुकृत्य गीतरामायणाख्यं महाकाव्यं निरमिमीत। यत्तु संस्कृतवाङ्मये गीतशैल्यां विरचितं प्रथमं महाकाव्यं वर्तते।

महाकाव्येऽस्मिन् रचनाकारः इन्द्रवज्रा-उपेन्द्रवज्रा-शिखरिणी-मन्दाक्रान्ता-शार्दूलविक्रीडितम्-स्रग्धरा इत्यादिषु संस्कृतच्छन्दःसु सन्दर्भश्लोकान् व्यरचयत्। परन्तु संस्कृतगीतेषु स भारतस्य विभिन्नप्रान्तेषु प्रचलितानां वाचां भाषाणाञ्च लोकव्यवहारे गीयमानानि विभिन्नगीतान्याधृत्य ग्रन्थान् विरच्य एकं नवीनमायामं स्थापितवान्। शिखरिणीछन्दसि विरचितस्य अयोध्याकाण्डप्रथम-सर्गस्य प्रथमः सन्दर्भश्लोकः उदाहृयते -

"वसन्ते वासन्ते स्वरतिरतिकान्ते मुखरिते
वयोव्राते वाते वहति मलयामोदमधुरे।
सरः कन्याकुब्जे मदि मधुपपुञ्जे रघुवरं
प्रियाजुष्टं जुष्टं जगुरिदमभीष्टं सुवदनाः॥"[१२]

एवमेव लौकिकगीतात्मकच्छन्दसि विरचितं सुन्दरकाण्डद्वितीयसर्गस्य चतुर्विंशतितमं गीतं द्रष्टव्यं यत् महाकविश्रीरामभद्राचार्यवर्यैः भैरवीरागे निबद्धम् —

"रघुनन्दन राघव राम हरे शरणं करवाणि तवाङ्घ्रिमहम्।
जनचन्दन राघव राम हरे शरणं करवाणि तवाङ्घ्रिमहम्॥
दशशीर्षकृताभिभवेन विभो स्वमनोभवशुक्प्रभवेण विभो!
भवभञ्जन भावुकधाम हरे शरणं करवाणि तवाङ्घ्रिमहम्॥ १॥
दशकण्ठविनाशनचण्डशरं भुवनैकधनुर्धरमेमिकरम्।
जनरञ्जन रञ्जननाम हरे शरणं करवाणि तवाङ्घ्रिमहम्॥ २॥
अव भक्तविभीषणमात्तभयं भवभूपविभूषणरोचिरयम्।
सुखवर्धन नीरदश्याम हरे शरणं करवाणि तवाङ्घ्रिमहम्॥ ३॥
परिपाहि कृपाकर भीमभवात् गिरिधरमव राघव घोरदवात्।
हृतबन्धनलोकललाम हरे शरणं करवाणि तवाङ्घ्रिमहम्॥ ४॥"[१३]

साकेतविहारिणः भगवच्छ्रीरामचन्द्रस्य गुणकीर्तनेन परिपूर्णं गीतरामायणमहाकाव्यं श्रीरामभद्राचार्यवर्यैर्न केवलं भक्तिरसान्वित-मपितु यथायोग्यं शब्दालङ्कारैरर्थालङ्कारैश्च परिपूर्य सौन्दर्या-धायकमपि कृतम्। तैः प्रयुक्ताः अलङ्काराः कुत्रापि स्वाभाविकतां न त्यजन्ति। अर्थात् तेषां प्रयोगेण काव्ये कुत्रापि गुरुत्वं न आयाति, प्रत्युत ते काव्यरसानुभूतौ सहायकत्वेन वर्तन्ते। स्वाभाविकरीत्या जगद्गुरुभिः पाण्डित्यप्रतिभाप्रदर्शनं विनैव अलङ्कारान् प्रयुज्य स्वकीयमिदं महाकाव्यं वर्तमानयुगस्य महाकाव्यग्रन्थेषु मूर्धाभिषिक्तं कृतम्। ते महाकाव्ये वर्ण्यविषयानुसारं सरलां सरसाञ्च शब्दरचनां कुर्वन्तः अलङ्काराणां तादृशं सुप्रयोगं कृतवन्तः येन सामान्यपाठकोऽपि तं सहजतया अवगच्छति, काव्यानुशीलने च तस्य चित्तमेकाग्रीभवति। सहृदयहृदयसंवेद्यया कोमलकान्तपदावल्या युक्तं महाकाव्यमिदं काव्यशास्त्रिभिः प्रतिपादितैः प्रायः सर्वैरलङ्कारैर्युक्तं वर्तते। अनुप्रास-यमक-श्लेषादयः शब्दालङ्काराः, उपमा-रूपक-उत्प्रेक्षा-अनन्वय-सन्देह-भ्रान्तिमान्-अर्थान्तरन्यास-दृष्टान्त-निदर्शना-समासोक्ति-विभावना-विशेषोक्ति-काव्यलिङ्ग-
अतिशयोक्त्यादयोऽर्थालङ्काराश्च गीतरामायणमहाकाव्ये रसानुभूतेः साधकाः भूत्वा काव्यानुशीलनकर्तुः चित्तं सहजमेव आवर्जयन्ति। अलङ्काराणां कतिपयान्युदाहरणानि द्रष्टव्यानि सन्ति।

अयोध्याकाण्डप्रथमसर्गस्य द्वितीयगीतं यमकानुप्रासालङ्कार-योरतिरमणीयं रूपं प्रस्तौति—

"विहरति जितरतिपतिरिहकुञ्जे।

विपुलबकुलकुलकुमुदकदम्बितमुखरितमधुकरपुञ्जे॥ १॥

कलरवकलितकाकलीकूजितपूजितसरससमीरे।

मलयनिलयपरिमलपरिरम्भितशिशिरितसरयूनीरे॥ २॥

गापितकिन्नरवधूवरूथे नर्तितनटीसहस्रे।

वादितविबुधदुन्दुभीनिकरे मङ्गलमयचतुरस्रे॥ ३॥

नीलकण्ठकलकण्ठकण्ठरवकुण्ठितमनोगभीरे।

हरिभवभवविशिखार्पितविग्रहसरिन्मनोहरतीरे॥ ४॥

सैरध्वजीनयनचातकजलधरो विजितशतमारः।

कविगिरिधरमतिनवनलिनीरविरविकुलरविः कुमारः॥ ५॥"[१४]

एवमेव बालकाण्डस्य 'सीताविर्भाव' इत्याख्ये पञ्चमे सर्गे अष्टाविंशतितमे गीते अनन्वयालङ्कारस्य सुमनोहरमुदाहरणं विद्यते। यत्र महर्षियाज्ञवल्क्येन जनकनन्दिनीसीतादेव्याः सौन्दर्यगानं कृतमस्ति —

"सीते त्वां कथं करवाणि प्रशंसाम्।

निरुपमरूपशीलगुणशोभां ललनाजगदवतंसाम्॥ १॥

यदि चम्पकं तवोपमानमनुचितं तदपि जगदम्ब।

तन्निशि सङ्कुचितं तव स्मितं सततमेकरसमम्ब॥ २॥

कनकेनोपमीयसे चेन्महती अनौचिती जाता।

तत् कठोरमथ जडं चिन्मयी त्वं मृदुला विख्याता॥ ३॥

चरणौ तव वनरुहोपमातुं मनसाऽहं जिह्रेमि।

तन्निशि सम्पुटितं स्फुटाविमौ समन्वयंश्च बिभेमि॥ ४॥

भवप्लवौ तव करौ वदन् पल्लवमिव किल सीदामि।

कलितकलङ्कचन्द्रमिव वदनं ब्रुवन् न प्रसीदामि॥ ५॥

वधिकवश्यखञ्जनमिव नयनं कथय कथं कथयानि।

अभयप्रदान्नदान् चपला इव प्रथय कथं प्रथयानि॥ ६॥

अमृतस्राविं कुन्तलान् विषधरभुजगैः किमु समयेयम्।

क्षणभङ्गां चपलामिव मूर्तिं कथयन् कं नमयेयम्॥ ७॥

अर्धदेहविषवन्धुमौखरीवरविश्लेषयुताभिः।

तुलये किं त्वां गिरिजावारिधिभवागिराकसुताभिः॥ ८॥

ज्ञात्वा सदा निरुपमामनघां निरवधिगुणां विनीताम्।

कविगिरिधरस्वामिनीं भगवतीं वन्द्यां वन्दे सीताम्॥ ९॥"[१५]

एवं गीतरामायणमहाकाव्यस्य परिचयेन सम्बद्धं उपर्युक्तविवेच-नानन्तरं निष्कर्षरूपेण वक्तुं शक्नुमः यत् धर्मचक्रवर्तिना महामहोपाध्यायेन वाचस्पतिपदवीविभूषितेन कविकुलमणिना महाकविना जगद्गुरुरामानन्दाचार्येण स्वामिश्रीरामभद्राचार्य-महोदयेन प्रणीतोऽयं ग्रन्थो निखिलसंस्कृतवाङ्मये गीतशैल्यां विरचितः प्रथमो महाकाव्यग्रन्थो वर्तते। यस्मिन् जगद्गुरुः साकेतविहारिणः श्रीरामचन्द्रस्य लोकोत्तरचरितगानं कृत्वा इमं प्रेमभक्तिरसेन परिपूरितवान्। काव्यशास्त्रीयैः समस्तैः आवश्यकतत्त्वैः समुचितसन्नि-वेशयुक्तोऽयं महाकाव्यग्रन्थः सहृदयपाठकान् श्रोतृंश्च काव्यात्मक-रसस्यानुभूत्या पूरयति। अपि च प्रभुश्रीरामचन्द्र-स्यादर्शचरितस्य गुणगानं, स्थाने-स्थाने भक्तिभावपूर्णा स्तुतिश्च पाठकान् श्रोतृंश्च सहजतया श्रीरामभक्त्या भावयति। महाकाव्येऽस्मिन् वर्णितात् श्रीरामस्यादर्शचरितात् सुप्रेरितः कश्चिदपि पाठकः श्रोता वा अवश्यमेव परमकल्याणं भजते। महाकाव्यान्ते कविगिरिधरेण प्रणीतः अधोलिखितो विश्रामश्लोकः अनयैव मङ्गलकामनया युक्तोऽस्ति —

"श्रीसीतारामपादाम्बुजरसरसिके नाप्तबोधेन दिव्यं

नव्यं गीतैः परीतं वसुखखहरिभिः प्रेमभक्त्येकसारम्।

गीतं श्रीदेववाण्यां गिरिधरकविना गीतरामायणं तत्

नित्यं श्रीरामभक्तिं दिशतु सुकृतिनां गीतसीताभिरामम्॥"[१६]

सन्दर्भग्रन्थाः

१. श्रीमम्मटाचार्यकृतः 'काव्यप्रकाश:' चतुर्थ-उल्लासः, सूत्र ४४, पृष्ठसंख्या ११५

२. तत्रैव, सूत्र ४७, पृष्ठ-संख्या १३८

३. श्रीविश्वनाथकविराजकृत- 'साहित्यदर्पण:' ३/१८२, पृष्ठसंख्या २२९

४. श्रीमम्मटाचार्यकृतः 'काव्यप्रकाश:' चतुर्थ-उल्लासः, व्याख्याकारः - आचार्यविश्वेश्वरसिद्धान्तशिरोमणिः, पृष्ठसंख्या ११८

५. गीतरामायणम्, बालकाण्ड, प्रथमसर्ग, मङ्गलाचरण, श्लोकसंख्या १, पृष्ठसंख्या १

६. तत्रैव, बालकाण्ड, प्रथमसर्ग, गीतसंख्या ४, पृष्ठसंख्या ७-८

७. तत्रैव, उत्तरकाण्ड, द्वितीयसर्ग, विश्रामश्लोक १, पृष्ठसंख्या ८४६

८. श्रीविश्वनाथकविराजकृत 'साहित्यदर्पण:' ३/२५१ - २५४ पूर्वार्ध, पृष्ठसंख्या २६७

९. तत्रैव, प्रथमपरिच्छेद, कारिकासंख्या ३ उत्तरार्ध, पृष्ठसंख्या २९

१०.गीतरामायणम्, बालकाण्ड, पञ्चमसर्ग, गीतसंख्या ३५, पृष्ठ-संख्या १५८

११. पाणिनीय शिक्षा, ४

१२.गीतरामायणम्, अयोध्याकाण्ड, प्रथमसर्ग, सन्दर्भश्लोक १, पृष्ठ-संख्या ३४५

१३.तत्रैव,सुन्दरकाण्ड, द्वितीयसर्ग, गीतसंख्या २४, पृष्ठसंख्या ७१५

१४.तत्रैव, अयोध्याकाण्ड, प्रथमसर्ग, गीतसंख्या २, पृष्ठसंख्या ३४६ से ३४७

१५.तत्रैव, बालकाण्ड, पञ्चम सर्ग, गीतसंख्या २८, पृष्ठसंख्या १५१ से १५२

१६.तत्रैव, उत्तरकाण्ड, विश्रामश्लोक १, पृष्ठसंख्या ८४६